ब(व)दरः, पुं, (बदति स्थिरीभवति छिन्नेऽपि पुनः प्ररोहतीति। बद् + अर।) कोलिवृक्षः। तत्पत्रादिगुणाः।
"बदरस्य पत्रलेपो ज्वरदाहविनाशनः।
त्वचा विस्फोटशमनी बीजं नेत्रामयापहम्॥"
इति राजनिर्घण्टः॥
अस्य पर्य्यायः फलगुणाश्च क्लीवलिङ्गबदरशब्दे द्रष्टव्याः॥ * ॥ देवसर्षपवृक्षः। इति राजनिर्घण्टः॥ कार्पासास्थि। इति मेदिनी॥ कापासेर विचि इति भाषा॥ तत्र अन्तःस्थवकारादिशब्दमध्ये गृहीतोऽयम्॥

ब(व)दरफली, स्त्री, (बदरस्येव फलमस्याः। बदरफल + ङीप्।) भूबदरी। इति राजनिर्घण्टः॥

ब(व)दरवल्ली, स्त्री, (बदरा बदरफलबहुला वल्ली लता।) भूबदरी। इति राजनिर्घण्टः॥

बदरा, स्त्री (बदति छिन्नायामपि पुनः प्ररोहणात् स्थिरीभवति या। बद् + बाहुलकादरः। टाप्।) वराहक्रान्तावृक्षः। (तत्पर्य्यायो यथा,
"वाराहीकन्द एवान्यैश्चर्म्मकारालुको मतः।
अनूपसम्भवे देशे वाराह इव लोमवान्।
विदारी स्वादुकन्दा च सा तु क्रोष्ट्री सिता स्मृता॥
इक्षुगन्धा क्षीरवल्ली क्षीरशुक्ला पयस्विनी।
वाराहवदना गृष्टिर्बदरेत्यपि कथ्यते॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) कार्पासीवृक्षः। इत्यमरः। २। ४। ११६॥ एलापर्णी। इति मेदिनी। रे, २०७॥ विष्णुक्रान्ता। इति विश्वः॥

बदरामलकं, क्ली, (बदरफलमिवामलकम्।) प्राचीनामलकम्। इति हारावली। १०२॥

बदरिः, स्त्री, (बद + बाहुलकादरिः।) कोलिवृक्षः। इति शब्दचन्द्रिका॥

बदरिकाश्रमः, पुं, क्ली, (बदरिकाचिह्नित आश्रमः।) तीर्थविशेषः। (असौ च हिमालयपर्व्वतैकदेशे श्रीनगरसमीपे अलकनन्दानद्याः पश्चिमस्यतीरे अवस्थितः।) स तु नारायणस्य व्यासस्य चाश्रमः। यथा, महाभारते। ३ धौम्यतीर्थयात्रापर्व्वणि ९०। २३—३३।
"नारायणो विभुर्विष्णुः शाश्वतः पुरुषोत्तमः।
तस्यातियशसः पुण्यां विशालां बदरीमनु॥
आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु विश्रुतः।
उष्णतोयवहा गङ्गा शीततोयवहा पुरा॥
सुवर्णसिकता राजन्! विशालां बदरीमनु।
ऋषयो यत्र देवाश्च महाभागा महौजसः॥
प्राप्य नित्यं नमस्यन्ति नारायणमजं विभुम्।
यत्र नारायणो देवः परमात्मा सनातनः॥
तत्र कृत्स्नं जगत् पार्थ! तीर्थान्यायतनानि च।
तत् पुण्यं तत् परं ब्रह्म तत्तीर्थं तत्तपोवनम्॥
तत् परं परमं देवं भूतानां परमेश्वरम्।
शाश्वतं परमञ्चैव धातारं परमं पदम्॥
यं विदित्वा न शोचन्ति विद्वांसः शास्त्रदृष्टयः।
तत्र देवर्षयः सिद्धाः सर्व्वे चैव तपोधनाः॥
आदिदेवो महायोगी यत्रास्ते मधुसूदनः।
पुण्यानामपि तत् पुण्यं तत्र ते संशयोऽस्तु मा॥
एतानि राजन्! पुण्यानि पृथिव्यां पृथिवीपते!।
कीर्त्तितानि नरश्रेष्ठ! तीर्थान्यायतनानि च॥
एतानि वसुभिः साध्यैरादित्यैर्मरुदश्विभिः।
ऋषिभिर्ब्रह्मकल्पैश्च सेवितानि महात्मभिः॥
चरन्नेतानि कौन्तेय! सहितैर्ब्रह्मवादिभिः।
भ्रातृभिश्च महाभागैरुत्कण्ठां विहरिष्यसि॥"
(तथा च भागवते। ७। ११। ६।
"योऽवतीर्य्यात्मनोऽंशेन दाक्षायण्यान्तु धर्म्मतः।
लोकानां स्वस्तयेऽध्यास्ते तपो बदरिकाश्रमे॥")

बदरी, स्त्री, (बदर + गौरादित्वात् ङीष्। बदरि + कृदिकारादिति पक्षे ङीष् वा।) कोलिवृक्षः। इत्यमरः। २।४।३६॥ (अस्याः पर्य्यायो बदरशब्दे द्रष्टव्यः। यथा, भागवते। १। ७। ३।
"तस्मिन् स आश्रमे व्यासो बदरीखण्डमण्डिते॥")
कार्पासी। इति शब्दरत्नावली॥ कपिकच्छुः। इति राजनिर्घण्टः॥ (बदर्य्याः फलम् हरीतक्यादिभ्यश्चेति विकारार्थस्य लुक्। बदरीफलम्॥)

बदरीच्छदा, स्त्री, (बदर्य्याश्छदा इव च्छदा यस्याः।) हस्तिकोलिवृक्षः। शङ्खनखी। इति रत्नमाला॥

बदरीपत्रः, पुं, (बदर्य्याः पत्रमिव आकृतिर्यस्य।) नखीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ (यथा,—
"बदरीपत्रकल्कं वा घृतभृष्टं ससैन्धवम्।
स्वरोपघाते कासे च लेहमेतत् प्रयोजयेत्॥"
इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे॥)

बदरीपत्रकं, क्ली, (बदरीपत्र + स्वार्थे कन्।) नखीनामगन्धद्रव्यम्। इति जटाधरः॥

बदरीफला, स्त्री, (बदर्य्याः फलमिव फलं यस्याः।) नीलशेफालिका। इति शब्दमाला॥

बदरीशैलः पुं, (बदरीबहुलः शैलः पर्व्वतः।) हिमालयपर्व्वतैकदेशः। बदरीवनं बदरिकाश्रम इति च ख्यातः। स तु श्रीनगराख्यदेशे अलकनन्दानदीपश्चिमतीरे वर्त्तते। इति पुराणान्तरम्॥

बद्धं, त्रि, (बध्यते स्म इति। बन्ध + कर्म्मणि क्तः।) बन्धनयुक्तम्। बाँधा इति भाषा। तत्पर्य्यायः। सन्दानितम् २ मूतम् ३ उद्धितम् ४ सन्दितम् ५ सितम् ६। इत्यमरः। ३। १। ९५॥ निगडितम् ७ नद्धम् ८ कीलितम् ९ यन्त्रितम् १० संयतम् ११। इति हेमचन्द्रः॥ (यथा, मनुः। ९। ३०८।
"वरुणेन यथा पाशैर्बद्ध एवाभिदृश्यते।
तथा पापान्निगृह्णीयात् व्रतमेतद्धि वारुणम्॥"
तथा च मेघदूते। ७९।
"तन्मध्ये च स्फटिकफलका काञ्चनीवासयष्टिर्मूले बद्धा मणिभिरनतिप्रौढ़वंशप्रकाशैः॥"
तथा च शाकुन्तले २ अङ्के।
"छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु॥")

बद्धगुदं, क्ली, (बद्धं गुदं पायुर्य्येन।) उदररोगविशेषः। तस्य निदानं यथा,—
"यस्यान्त्रमन्नैरुपलेपिभिर्व्वा
बालाश्मभिर्वा पिहितं यथावत्।
सञ्चीयते तस्य मलः सदोषात्
शनैः शनैः सङ्करवच्च नाड्याम्॥
निरुध्यते तस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम्।
हृन्नाभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति॥"
इति माधवकरः॥ * ॥
तस्य चिकित्सा यथा। "स्निग्धस्विन्नस्याभ्यक्तस्याधो नाभेर्वामतश्चतुरङ्गुलमपहाय रोमराज्या उदरं पाटयित्वा चतुरङ्गुलप्रमाणमन्त्राणि निष्कृष्य निरीक्ष्य बद्धगुदस्यान्त्रप्रतिरोधकरमश्मानं बालं वापोह्य मलजातं वा ततो मधुसर्पिर्भ्यामभ्यज्यान्त्राणि यथास्थानं स्थापयित्वा बाह्यं व्रणमुदरस्य सीव्येत् छिद्रणीयोक्तेन विधानेन च रोपयेत्।" इति सुश्रुते चिकित्सितस्थाने १४ अध्यायः॥ (तथास्य सकारणलक्षणम्।
"पक्ष्मवालैः सहान्नेन भुक्तैर्बद्धायने गुदे।
उदावर्त्तैस्तथार्शोभिरन्त्रसंमूर्च्छनेन वा॥
अपानो मार्गसंरोधात् हत्वाग्निं कुपितोऽनिलः।
वर्च्चःपित्तकफान् रुद्ध्वा जनयत्युदरं ततः॥"
तस्य रूपाणि।
"तृष्णादाहज्वरमुखतालुशोषोरुसादकासश्वासदौर्ब्बल्यारोचकाविपाकवर्च्चोमूत्रसङ्गाध्मानच्छर्दिक्षवथुशिरोहृन्नाभिगुदशूलान्यपि चोदरं मूढ़वातं स्थिरमरुणनीलराजीसिरावनद्धमराजिकं वा प्रायो नाभ्युपरि गोपुच्छवदभिनिर्व्वर्त्तयति इत्येतत् बद्धगुदोदरमिति विद्यात्॥"
तथास्य चिकित्सा।
"स्विन्नाय बद्धोदरिणे मूत्रं तीक्ष्णौषधान्वितम्।
सतैललवणं दद्यात् निरूहं सानुवासनम्॥"
इति चरके चिकित्सितस्थाने त्रयोदशेऽध्याये॥)

बद्धपाणि, स्त्री, बद्धपाणिः। मुष्टिः। इति पुराणान्तरम्॥ बद्धाप्णीति च पाठः॥

बद्धफलः, पुं, (बद्धानि फलानि यस्येति।) करञ्जवृक्षः। इति राजनिर्घण्टः॥ (विवृतिरस्य करञ्जशब्दे ज्ञातव्या॥)

बद्धमुष्टिः, त्रि, (बद्धा दृढ़ा दानान्निवृत्ता वा मुष्टिर्यस्येति।) दृढ़मुष्टिः। कृपणः। यथा, नैषधे। ३। ८५।
"सजीवमप्यर्थिमुदे ददज्ज-
स्तव त्रपा नेदृशबद्धमुष्टेः॥"

बद्धमूलं, त्रि, (बद्धं मूलं यस्येति।) दृढ़मूलम्। उत्पाटनानर्हमूलम्। यथा, माघे। २। ३८।
"त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे!।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥"

बद्धरसालः, पुं, (बद्धो रसेन आवृतः अतएव रसालः रसवान्।) त्रिविधराजाम्रान्तर्गता-